॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय २३

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम् ।
पतिं लोकाच्च्युतं तारा मृतं वचनमब्रवीत् ॥ १॥

शेषे त्वं विषमे दुःखमकृत्वा वचनं मम ।
उपलोपचिते वीर सुदुःखे वसुधातले ॥ २॥

मत्तः प्रियतरा नूनं वानरेन्द्र मही तव ।
शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३॥

सुग्रीव एव विक्रान्तो वीर साहसिक प्रिय ।
ऋक्षवानरमुख्यास्त्वां बलिनं पर्युपासते ॥ ४॥

एषां विलपितं कृच्छ्रमङ्गदस्य च शोचतः ।
मम चेमां गिरं श्रुत्वा किं त्वं न प्रतिबुध्यसे ॥ ५॥

इदं तच्छरशयनं यत्र शेषे हतो युधि ।
शायिता निहता यत्र त्वयैव रिपवः पुरा ॥ ६॥

विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय ।
मामनाथां विहायैकां गतस्त्वमसि मानद ॥ ७॥

शूराय न प्रदातव्या कन्या खलु विपश्चिता ।
शूरभार्या हतां पश्य सद्यो मां विधवां कृताम् ॥ ८॥

अवभग्नश्च मे मानो भग्ना मे शाश्वती गतिः ।
अगाधे च निमग्नास्मि विपुले शोकसागरे ॥ ९॥

अश्मसारमयं नूनमिदं मे हृदयं दृढम् ।
भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा गतम् ॥ १०॥

सुहृच्चैव हि भर्ता च प्रकृत्या च मम प्रियः ।
आहवे च पराक्रान्तः शूरः पञ्चत्वमागतः ॥ ११॥

पतिहीना तु या नारी कामं भवतु पुत्रिणी ।
धनधान्यैः सुपूर्णापि विधवेत्युच्यते बुधैः ॥ १२॥

स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ।
कृमिरागपरिस्तोमे त्वमेवं शयने यथा ॥ १३॥

रेणुशोणितसंवीतं गात्रं तव समन्ततः ।
परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ ॥ १४॥

कृतकृत्योऽद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे ।
यस्य रामविमुक्तेन हृतमेकेषुणा भयम् ॥ १५॥

शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ।
वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते ॥ १६॥

उद्बर्ह शरं नीलस्तस्य गात्रगतं तदा ।
गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा ॥ १७॥

तस्य निष्कृष्यमाणस्य बाणस्य च बभौ द्युतिः ।
अस्तमस्तकसंरुद्धो रश्मिर्दिनकरादिव ॥ १८॥

पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः ।
ताम्रगैरिकसम्पृक्ता धारा इव धराधरात् ॥ १९॥

अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना ।
अस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् ॥ २०॥

रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम् ।
उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना ॥ २१॥

अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम् ।
सम्प्रसक्तस्य वैरस्य गतोऽन्तः पापकर्मणा ॥ २२॥

बालसूर्योदयतनुं प्रयान्तं यमसादनम् ।
अभिवादय राजानं पितरं पुत्र मानदम् ॥ २३॥

एवमुक्तः समुत्थाय जग्राह चरणौ पितुः ।
भुजाभ्यां पीनवृताभ्यामङ्गदोऽहमिति ब्रुवन् ॥ २४॥

अभिवादयमानं त्वामङ्गदं त्वं यथापुरा ।
दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे ॥ २५॥

अहं पुत्रसहाया त्वामुपासे गतचेतनम् ।

सिंहेन निहतं सद्यो गौः सवत्सेव गोवृषम् ॥ २६ ॥

इष्ट्वा सङ्ग्रामयज्ञेन नानाप्रहरणाम्भसा ।
अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना ॥ २७ ॥

या दत्ता देवराजेन तव तुष्टेन संयुगे ।
शातकुम्भमयीं मालां तां ते पश्यामि नेह् किम् ॥ २८ ॥

राजश्रीर्न जहाति त्वां गतासुमपि मानद ।
सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा ॥ २९ ॥

न मे वचः पथ्यमिदं त्वया कृतं
न चास्मि शक्ता हि निवारणे तव ।
हता सपुत्रास्मि हतेन संयुगे
सह् त्वया श्रीर्विजहाति माम् इह् ॥ ३० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com